संस्कृत

क्र. नं. २७

स्तोत्र

कर्पूरस्तोत्र

६९८/स्तो. २५७

लिपीचा नमुना

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥ ॥कर्पूरं मध्यमांत्यस्वरपरिरहितं सेंदुवामाक्षियुक्तं बीजंते मातरेत
त्रिपुरहरवधूस्त्रिष्कृतंयेपवंति ॥ तेषांगद्यानिपद्यानिचमुखकुहराडुल्लसंत्येववाचः॥
स्वच्छंदंध्वांतधाराधररुचिरुचिरे सर्वसिद्धिंगतानां॥१॥ ईशानःसेंदुवामश्रवणमनुगतो
बीजमन्यन्महेशि द्वंद्वंतेमंदचेतायदिजपतिजनोवारमेकंकदाचित् जित्वावाचाम
धीशंधनदमपिचिरंमोहयन्नंबुजाक्षीवृंदंचंद्रार्द्धचूडेप्रभवतिसुमहाघोरबाणाव
तंसे॥२॥ ईशोवैश्वानरस्थःशशधरविलसद्वामनेत्रेणयुक्तोबीजंतेद्वंद्वमेतद्विग
लितचिकुरेकालिकेयेजपंति॥ द्वेष्टारंतेनिघ्नंतित्रिभुवनमपितेवश्यभावंनयं

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

ति। सृक्कद्वंद्वास्रधाराविनिहितवदने दक्षिणे कालिकेति ॥३॥ जप्त्वैवं नाम युग्मं तव विम
लमतुं भावयंत्येवमंतस्तेषामष्टौकरस्थाः प्रकटितवदने सिद्धय स्त्र्यंबकस्य॥ ऊ
र्द्ध्वे वामे कृपाणं करकमले छिन्नमुंडं तथाधः सव्ये भीतिं वरं च त्रिजगदघहरे दक्षिणे का
लिकेति ॥४॥ वर्गाद्यं वह्निियुक्तं विधुरतिमिलितं तत्त्रयं कूर्चयुग्मं॥ लज्जाद्वंद्वं च पश्चा
त्स्मितमुखि तदधष्ठद्वयं योजयित्वा॥ मातर्ये ये जपंति स्मरहरमहिले भावयंतः स्वरू
पं ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति ॥५॥ प्रत्येकं वा त्रयं वा द्व १
यमपि च परं बीजमत्यंतगुह्यं। त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयंतो जपंति

" Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

तेषांनेत्रारविंदेविहरतिकमलावक्त्रशुभ्रांशुबिंबे वाग्देवीदेविमुंडस्रगतिशयलस
त्कंठपीनस्तनाढ्ये ॥६॥ गतासूनांबाहुप्रकरकृतकांचीपरिलसतैन्नितंबांदिग्वस्त्रां
त्रिभुवनविधात्रींत्रिनयनां ॥ श्मशानस्थांतल्पेशवहृदिमहाकालसुरतप्रयुक्तांत्वां
ध्यायन्नृजननिजडचेताअपिकविः ॥७॥ शिवाभिःशर्वाणिशवनिवहमुंडास्थिनिक
रैःपरंसंकीर्णायांप्रकटितचितायांहरवधूं ॥ प्रविष्टांत्वांतुष्टामुपरिसुरतेनातियुव
तींप्रसन्नांध्यायंतिक्वचिदपिनतेषांपरिभवः ॥८॥ वदामस्तेकिंवाजननिवयमुच्चै
र्जडधियोनधातानापीशोहरिरपि नतेवेत्तिपरमं ॥ तथापित्वद्भक्तिर्मुखरयति

(3)

वास्माकमपितेतदेतत्क्षंतव्यंनखलुपशुरोषःसमुचितः ॥ ९ ॥ समंतादापीनस्तनज

ता घनभारावनवतीरहस्यौसक्तोनक्तंयदिजपतिभक्तस्तवमनुं ॥ विवासास्त्वांध्यायन्गलि

तचिकुरस्तस्यवशगासमस्तासिद्धौघाभुविचिरतरंजीवतिकविः ॥ १० ॥ समाःस्वस्थी

भूतोजपतिविपरीतांयदिसदाविचिंत्यत्वांध्यायन्नतिशयमहाकालसुरतां ॥ तदात

स्यक्षोणीतलविहरमानस्यविदुषःकरांभोजेवश्याहरवधूमहासिद्धिनिवहाः ॥ ११ ॥ सिद्धि२

प्रसूतेसंसारंजननिभवतिपालयतिचसमस्तंक्षित्यादिप्रलयसमयेसंहरतिच ॥

अतस्त्वांधातापित्रिभुवनपतिःश्रीपतिरहोमहेशोपिप्रायःसकलमपिकिंस्तौतिभ २

(3अ)

वंती॥१२॥अनेकेसेवंतेभवदधिकगीर्वाणनिवहान्विमूढास्तेमातःकिमपिनहिजानंति
परमं॥समाराध्यामाद्यांहरिहरविरिंच्यादिविबुधैःप्रपन्नोस्मिस्वैरंरतिरसमहानंद
निरतां॥१३॥धरित्रीकीलालंशुचिरपिसमीरोपिगगनंत्वमेकाकल्याणीगिरिशरम
णीकालिसकलं॥स्तुतिःकातेमातर्निजकरुणयामामगतिकंप्रसन्नात्वंभूयाभव
मनुनभूयान्ममजनुः॥१४॥श्मशानस्थःस्वस्थोगलितचिकुरोदिक्पटधरःस
हस्रंत्वर्काणांनिजगलितवीर्येणकुसुमं॥जपंस्त्वत्प्रत्येकंमनुमपितवध्याननिरतो
महाकालिस्वैरंसभवतिधरित्रीपरिवृढः॥१५॥गृहेसंमार्जन्यापरिगलितवीर्येणकु

सुमं ॥ समूलंमध्याह्नेवितरतिचितायांकुजदिने ॥ समुच्चार्यप्रेम्णामनुमपिसकृत्कालि
सततंगजारूढोयातिक्षितिपरिवृढःसत्कविवरः ॥ १६ ॥ कुशेषैराकीर्णंकुसुमधनु
षोमंदिरमहोपुरोध्यायन्ध्यायन्जपतियदिभक्तस्तवमनुं ॥ सगंधर्वश्रेणीपतिरिव
कवित्वामृतनदीनदीनःपर्यंतेपरमपदलीनःप्रभवति ॥ १७ ॥ त्रिपंचारेपीठेशवशिव
हृदिस्मेरवदनांमहाकालेनोच्चैर्मदनरसलावण्यनिरतां ॥ समासक्तोनक्तंस्वयमपि
रतानंदनिरतोजनोयोध्यायेत्त्वामपिजननिसस्यात्स्मरहरः ॥ १८ ॥ सलोमास्थि
स्वैरंपललमपिमार्जारमसितेपरंचौष्ट्रंमेषंनरमहिषयोश्छागमपिवा ॥ बलिंतेपू

(५अ)

जायामपिविमलवक्त्रांवितरतांसतांसिद्धिःसर्वाप्रतिपदमसर्वाप्रभवति॥१९॥वशीलक्ष
क्षंमंत्रंमंत्रंप्रजपतिहविष्याशनरतोदिवामातर्युष्मच्चरणयुगलध्याननिपुणः।परं
नक्तंनग्नोनिधुवनविनोदेनचमनुंजपेल्लक्षंसस्यात्स्मरहरसमानःक्षितितले।२०
इदंस्तोत्रंमातस्तवमनुसमुद्धारणजपस्वरूपाख्यंपादांबुजयुगलपूजाविधियु
तं॥निशार्द्धेवापूजासमयमथवायस्तुपठतिप्रलापस्तस्यापिप्रसरतिकवित्वामृत
रसः॥२१॥कुरंगाक्षीवृंदंतमनुसरतिप्रेमतरलंवशस्तस्यक्षोणीपतिरपिकुबेर
प्रतिनिधिः॥रिपुःकारागारंकलयतिचतत्केलिकलयाचिरंजीवन्मुक्तःप्रभव

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(९)

तिसन्नकः प्रतिजनु॥२२॥ इतिउत्तरपटलेत्रिंशत्तमेध्यायेकर्ईरस्तोत्रंसंपूर्णं॥

॥कपूरस्तो

४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com